# चतुर्थः पाठः

# नीतिश्लोकाः

(नीतिशतकात्)

**भर्तृहरिः**

## परिचयः

सूक्तिः सदुक्तिः वा सुभाषितमिति कथ्यते। सुभाषितानां प्रतिपाद्यवस्तुनः क्षेत्रं सुविशालं भवति, यद् वा अपरिमितं निस्सीममेव भवतीति। काव्यशास्त्रविनोदः, लोकोक्तयः, काव्यात्मक– सौन्दर्ययुक्ताः उपदेशाः, वक्रोक्तिवचनानि, अन्योक्तिवचनानि, भावानां मनोवैज्ञानिकं निरूपणम्, आध्यात्मिकं दार्शनिकं च चिन्तनम्, जीवनदिशा–निर्देशकानि नीतिवचननानि चेति अनेके विषयाः सुभाषितेषु समाविष्टाः सन्ति। तथापि नीतिवचनानामेव प्राधान्यं मुख्यरूपेण सुभाषितेषु दृश्यते। एतस्मिन् पाठेऽपि नीतिवचनानि एव सङ्गृहीतानि सन्ति। एतानि नीतिवचनानि विभिन्नेभ्यः ग्रन्थेभ्यः न सङ्कलितानि, अपितु श्रीभर्तृहरिविरचित 'नीतिशतक' नामधेयात् ग्रन्थाद् एव पद्यरूपाणि सङ्कलितानि सन्ति। एतेषां नीतिपरकपद्यानाम् अङ्गीकरणेन अस्माकं जीवने बहुविधः लाभः भवितुमर्हति। एतदर्थमेव यानि महत्त्वपूर्णानि पद्यानि सन्ति, तेषामेव सङ्ग्रहः अत्र विद्यते।

सुभाषितैरलङ्कृतस्य 'नीतिशतक' नामधेयस्य ग्रन्थविशेषस्य रचयिता महाकविः भर्तृहरिः विद्यते। अस्य महाकवेः शतकत्रयं संस्कृतकाव्यजगति सुविख्यातं वर्तते। तेषां नामानि इमानि सन्ति – (1) नीतिशतकम् (2) शृङ्गारशतकम् (3) वैराग्यशतकम्। अस्य महाकवेः जन्मदेश–कालादि विषये पर्याप्तं प्रामाणिकं तथ्यं न उपलभ्यते। तथापि दन्तकथानुसारेण अयं महाकविः महाराजस्य विक्रमादित्यस्य अग्रजः आसीदिति स्वीक्रियते। एतदर्थम् अस्य स्थितिकालः ईसा–पूर्व–प्रथम–शताब्दी मन्यते।

## नीतिश्लोकाः

**अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं, ब्रह्माऽपि तं नरं न रञ्जयति ।। 1 ।।**

**पदच्छेदः –** अज्ञः सुखम् आराध्यः सुखतरम् आराध्यते विशेषज्ञः। ज्ञानलवदुर्विदग्धम्, ब्रह्मा अपि तम् नरम् न रञ्जयति।

**अन्वयः** – अज्ञः सुखम् आराध्यः विशेषज्ञः सुखतरम् आराध्यते। (किन्तु) ज्ञानलवदुर्विदग्धं तं नरं बह्मा अपि न रञ्जयति।

**प्रसङ्गः** – अत्र कविः मानवप्रकृतिं त्रिषु भागेषु विभज्य मूर्खस्य हठवादितां वर्णयति।

**व्याख्या** – अज्ञः जानातीति ज्ञः, न जानातीति अज्ञः अर्थात् – मूर्खः ज्ञानहीनः अज्ञानी वा। सुखम् सूखपूर्वकं सरलतापूर्वकं वा। आराध्यः – आराधयितुं योग्यः बोधयितुं योग्यः वा। विशेषज्ञः विशेषं जानातीति विशेषज्ञः, अर्थात् विशेषज्ञाता विज्ञः वा। सुखतरम् सरलतररूपेण। आराध्यते – बोध्यते, बोधायितुं शक्यते वा। ज्ञानलवदुर्विदग्धम् – स्वल्पमात्रज्ञानेन पण्डितम्मन्यः इति। तम् – तादृशम्, नरम् – पुरुषम्, ब्रह्मा अपि–साक्षात् पितामहः अपि, विधाता अपि वा। न – नहि, रञ्जयति प्रसादयति, सन्तोषयति वा। अत्र अर्थापत्तिः अलङ्कारो वर्तते।

**भावार्थः** – अज्ञः जनः अल्पेन प्रयासेन प्रसादयितुं शक्यः भवति विशेषज्ञस्तु नितान्तमनायासेन प्रसादनीयः भवति, परन्तु पण्डितमानिनं मूर्खजनं स्वयं ब्रह्मा (विधाता) अपि प्रसादयितुं न शक्नोति।

## व्याकरणम् –

अज्ञः–न जानातीति अज्ञः। आराध्यः – आङ्. (आ) + राध् + ण्यत् (य) + सु। ज्ञानलवदुर्विदग्धम् – ज्ञानस्य लवः इति ज्ञानलवः, तेन दुर्विदग्ध इति ज्ञानलवदुर्विग्धः, तम्। रञ्जयति – रञ्ज् + णिच् + लट्–तिप्।

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति।। 2 ।।**

**पदच्छेदः** – दानम् भोगः नाशः तिस्रः गतयः भवन्ति वित्तस्य, यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति।

**अन्वयः** – वित्तस्य दानं, भोगः नाशः (इति) तिस्रः गतयः भवन्ति। यः (धनं) न ददाति न (च) भुङ्क्ते, तस्य तृतीया गतिः भवति।

**प्रसङ्गः** – अस्मिन् श्लोके कृपणानां वित्तस्य का गतिः भवतीति कविः निरूपयति।

**व्याख्याः** – वित्तस्य – धनस्य अर्थस्य वा, दानम् – प्रदानं, वितरणं वा, भोगः – उपभोगः, ऐश्वर्यसुखादिप्राप्तिः वा, नाशः – विनाशः, विघ्नं वा, तिस्रः त्रिसंख्याकाः, गतयः परिणामाः, दशाः वा, भवन्ति – जायन्ते। यः – जनः, न ददाति – दानं न करोति, न च भुङ्क्ते – न च उपभोगं करोति, तस्य – धनस्य, वित्तस्य वा, तृतीया – अवशिष्टा विनाशरूपा तृतीयसंख्याका, गतिः – अवस्था परिणामो वा भवति – जायते। अत्र आर्यानामच्छन्दः वर्तते।

**भावार्थः** – वित्तस्य (धनस्य) सत्पात्रेभ्यः वितरणम्, आत्मनः कृते सुखाद्युपभोगः विनाशश्च–एताः तिस्रः गतयः भवन्ति। यः पुरुषः धनस्य दानं न करोति, स्वयम् उपभोगं न करोति तस्य पुरुषस्य अवशिष्टमखिलं धनं विनश्यति।

## व्याकरणम् –

गतयः – गम् + क्तिन् (ति) + जस्। नाशः – नश् + घञ् (अ) + सु। भोगः – भुज् – घञ् (अ)

+ सु। दानम् – दा + ल्युट् (यु – अन) + सु – अम्)

**सिंहः शिशुरपि निपतति, मदमलिनकपोलभित्तिषु गजेषु।**

**प्रकृतिरियं सत्त्ववतां, न वयस्तेजसां हेतुः।। 3 ।।**

**पदच्छेदः –** सिहः शिशुः अपि निपतति मदमलिनकपोलभित्तिषु गजेषु। प्रकृतिः वयः तेजसः हेतुः न खलु (भवति)।

**प्रसङ्गः –** अस्मिन् श्लोके कविः बलशालिनां स्वभावं वर्णयति।

**व्याख्या –** शिशुः अपि –अल्पवयस्कोऽपि, बालोऽपि वा, सिंहः केसरी मृगेन्द्रः वा, मदमलिनकपोलभित्तिषु – मदजलदानजलेन समलगण्डपटलेषु, गजेषु – हस्तिषु करिषु वा, निपतति – आक्रमणं करोति, प्रहरति वा, इयम् – एषा, सत्ववताम् – बलशालिनां प्रतापशालिनां वा, प्रकृतिः, स्वभावः, मूलप्रवृत्तिः वा, वयः – अवस्था, आयुः वा, तेजसः प्रतापस्य वर्चसः वा, हेतुः –कारणं निमित्तं वा, न –नहि, खलु – निश्चयेन , भवति – जायते। अत्र अर्थान्तरन्यासः अलङ्कारः वर्तते।

**भावार्थः –** तेजस्विनः स्वभावाद् एव प्रतापं प्रकटयन्ति, तत्र आयुः कारणं न भवति। यथा सिंहः शिशुरपि गजराजस्य गण्डस्थलं विदारयति।

### व्याकरणम् –

**मदमलिनकपोलभित्तिषु –** मदेन मलिनाः कपोलभित्तयः येषां तेषु मदमलिनकपोलभित्तिषु। सत्ववताम् – सत्व + मतुप् + आम्, गजेषु – गज + सुप् (स.+ ब.)

**येषां न विद्या न तपो न दानम्,**

**ज्ञानं न शीलं न गुणो न धर्मः**

**ते मर्त्यलोके भुवि भारभूताः,**

**मनुष्यरूपेण मृगाश्चरन्ति।। 4 ।।**

**पदच्छेदः –** येषाम् न विद्या न तपः न दानम् ज्ञानम् न शीलम् न गुणः न धर्मः ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।

**अन्वयः –** येषां विद्या न तपः न, दानं न, शीलं न, गुणो न, धर्मः न, ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।

**प्रसङ्गः–**अस्मिन् पद्ये कविः विद्यातपसादिहीनः जनः पशुवद् भवतीति प्रतिपादयति।

**व्याख्या –** येषाम् – येषां मनुष्याणां जनानां वा, न–नैव, विद्या – शास्त्रादिज्ञानम् न – नैव, तपः – तपश्चर्या, न – नैव, दानम् – दानवृत्तिः, समर्पणं वा, न – नैव, शीलम् – चरित्रं श्रेष्ठाचरणं वा, न – नैव, गुणः – दयादाक्षिण्यादिगुणविशेषः, न – नैव, धर्मः – आस्था प्रवृत्तिः, कर्तव्यनिष्ठा वा, ते – ते जनाः, मर्त्यलोके – मानवलोके, भुवि – धरायां पृथिव्यां वा, भारभूताः – भारस्वरूपाः, मनुष्यरूपेण – मानवरूपेण, मनुष्यशरीरेण वा, मृगाः – पशवः– जन्तवः वा, चरन्ति – सञ्चरन्ति विचरन्ति वेति। अत्र मनुष्येषु मृगत्वारोपाद् रूपकालङ्कारोऽस्ति।

**भावार्थः** – अस्मिन् लोके येषां मनुष्याणां समीपे विद्या, तपः, ज्ञानं दानं शीलं गुणः धर्मश्चेति न विद्यन्ते ते अस्यां धरायां भारस्वरूपाः पशव इव मनुष्याकारेण इतस्ततः भ्रमन्ति।

### व्याकरणम् –

मर्त्यानां लोकः मर्त्यलोकः तस्मिन् मर्त्यलोके (ष.त.) मनुष्यरूपेण – मनुष्याणां रूपं मनुष्यरूपं, तेन मनुष्यरूपेण (ष.त.), विद्या – विद् + यत् + टाप् + सु,

भारभूताः – भारभू + क्त + जस्।

**साहित्यसङ्गीतकलाविहीनः,**
**साक्षात् पशुः पुच्छविषाणहीनः।**
**तृणं न खादन्नपि जीवमानः,**
**तद्भागधेयं परमं पशूनाम्।। 5 ।।**

**पदच्छेदः** – साहित्यसंगीतकलाविहीनः (जनः) साक्षात् पशुः पुच्छविषाणहीनः, तृणम् न खादन् अपि जीवमानः तद् भागधेयं परमं पशूनाम्।।

**अन्वयः** – साहित्यसंगीतकलाविहीनः पुच्छविषाणहीनः साक्षात् पशुः, तृणं न खादन् अपि जीवमानः तत् पशूनां परमं भागधेयम्।

**प्रसङ्गः** – अत्र यः जनः साहित्य–संगीत–कला–विहीनः भवति तस्य स्थितिः पशुवत् भवतीति वर्णयति कविः।

**व्याख्या** – साहित्यसंगीतकलाविहीन – काव्यनृत्यगीतशिल्पादिरहितः शून्यो वा, (जनः मनुष्यः), पुच्छविषाणहीनः – लाड्.गूलविषाणरहितः, साक्षात् – प्रत्यक्षमेव, स्फुटमेव वा, पशुः – जन्तुः मृगः वा, तृणम् – घासादिकम्, न–नैव, खादन्–भक्षयन् चरन् वा, अपि जीवमानः, – अपि जीवति, जीवनं धारयति वा, तत् पशूनाम्–वास्तविकगवादिजन्तूनाम्, परमम्–उत्तमं श्रेष्ठं वा, भागधेयम्–सौभाग्यम् (अस्ति)। अत्र रूपकालड्.कारः वर्तते।

भावार्थः – साहित्यसंगीतादिविषयेभ्यः अनभिज्ञः मनुष्यः पशुसदृशः भवति। एतादृशः जनः तृणं न खादतीति पशूनां सौभाग्यमस्ति।

### व्याकरणम् –

साहित्यसंगीतकलाविहीनः – साहित्यञ्च संगीतञ्च कलाः च साहित्यसंगीतकलाः, ताभिः विहीनः साहित्यसंगीतकलाविहीनः। पुच्छ–विषाणहीनः पुच्छं च विषाणे च पुच्छ–विषाणानि तेषां समाहारः पुच्छविषाणम् तेन हीनः – पशुः पुच्छविषाणहीनः, जीवमानः–जीव् + शानच् (आन) + सु।

**रत्नैर्महार्हैस्तुतुषुर्न देवाः,**
**न भेजिरे भीमविषेण भीतिम्।**
**सुधां विना न प्रययुर्विरामम्,**
**न निश्चितार्थाद्विरमन्ति धीराः।। 6 ।।**

**पदच्छेदः** – रत्नैः महार्हैः तुतुषुः न देवाः न भेजिरे भीमविषेण भीतिम्, सुधां विना न प्रययुः विरामम् न निश्चितार्थाद् विरमन्ति धीराः।

**अन्वयः** – देवाः महार्हैः रत्नैः न तुतुषुः भीमविषेण (अपि) भीतिं न भेजिरे, सुधां विना विरामं न प्रययुः। (हि) धीराः निश्चितार्थात् न विरमन्ति।

**प्रसङ्गः** – धीराः पुरुषाः निश्चितार्थात् न विरमन्ति, ते तत् कार्यं पूर्णमेव कुर्वन्तीति।

**व्याख्या** – देवाः – सुराः अमरा वा, महार्हैः – बहुमूल्यैः, मूल्याधिक्यैः वा, रत्नैः–मणिविशेषैः, न – नैव, तुतुषुः – सन्तुष्टाः अभवन्, सन्तोषं प्राप्तवन्तः वा, भीमविषेण – भयङ्.करहलाहलेन, भयङ्करकालकूटेन वा, भीतिम् – भयम्, त्रासं वा, न–नैव भेजिरे–लेभिरे, प्राप्तवन्तः वा, सुधाम् – अमृतम्, पीयूषं, विना–अन्तरेण, विरामम् – विरतिम्, कार्यावसानं वा, न–नैव, प्रययुः–गतवन्तः, धीराः–धैर्यशालिनः धीरपुरुषाः, निश्चितार्थात्–प्रधानोद्देश्यात् प्रतिज्ञातार्थात्, न – नैव, विरमन्ति–पराङ्. मुखाः भवन्ति, विरताः जायन्ते। अत्र अर्थान्तरन्यासोऽलङ्कारः वर्तते।

**भावार्थः** – धैर्यशालिनः पुरुषाः लक्ष्यप्राप्तिपर्यन्तं सततं प्रयत्नशीलाः भवन्तीति।

**व्याकरणम्** – महार्हैः महान् अर्हः यस्य सः महार्हः तैः महार्हैः (ब.व्री.) भीमविषम्–भीमं च तत् विषमिति भीमविषम्, तेन (कर्मधा.) निश्चितार्थात् – निश्चितः चासौ अर्थः निश्चितार्थः, तस्मात् निश्चितार्थात् (कर्मधा.)

> **भवन्ति नम्रास्तरवः फलोद्गमैः,**
> **नवाम्बुभिर्दूरविलम्बिनो घनाः।**
> **अनुद्धताः सत्पुरुषाः समृद्धिभिः,**
> **स्वभाव एवैष परोपकारिणाम्।। 7 ।।**

**पदच्छेदः** – भवन्ति नम्राः तरवः फलोद्गमैः नवाम्बुभिः दूरविलम्बिनः घनाः। अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभावः एव एषः परोपकारिणाम्।

**अन्वयः** – तरवः फलोद्गमैः नम्राः भवन्ति घनाः नवाम्बुभिः दूरविलम्बिनः (भवन्ति)। सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति), एषः परोपकारिणां स्वभाव एव।

**प्रसङ्गः**– अत्र परोपकारिणां जनानां स्वभावं कविः वर्णयति।

**व्याख्या** – तरवः– वृक्षाः, शाखिनः वा, फलोद्गमैः – फलप्रादुर्भावैः, फलागमैः वा, नम्राः – अवनताः भवन्ति – जायन्ते, घनाः – मेघाः जलदाः वा, नवाम्बुभिः – नूतनजलैः, अभिनतवारिभिः वा दूरविलम्बिनः दूरं भूमिपर्यन्तं लम्बमानाः (भवन्ति), सत्पुरुषाः सज्जनाः साधुजनाः वा, समृद्धिभिः – सम्पत्तिभिः ऐश्वर्यैः वा, अनुद्धताः –निरभिमानाः, (भवन्ति), एषः –अयमेव, उपरिनिर्दिष्टः परोपकारिणाम् –परसेवायां तत्पराणाम्, परहितरतानां सज्जनानां वा, स्वभावः– प्रकृतिः जन्मजातगुणो वा, एव– नूनमस्ति।

**भावार्थः** – वृक्षाः फलोद्गमैः, जलदाः नूतनवर्षाजलैः सत्पुरुषाः च विभवैः नम्राः भवन्ति। यतो हि एषः परोपकारिणां नैसर्गिकः गुणः वर्तते।

**व्याकरणम् –**

**फलोद्गमैः –** फलानाम् उद्गमः फलोद्गमः तैः फलोद्गमैः (ष.त.) नवं च तद् अम्बु इति नवाम्बु तैः नवाम्बुभिः (कर्मधा.), दूरविलम्बिनः – दूरं विलम्बितं शीलम् अस्य इति दूरविलम्बी, ते–दूर–विलम्बिनः (उपपदसमासः)।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः,**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः,**
**प्रारब्धमुत्तमजना न परित्यजन्ति।। 8 ।।**

**पदच्छेदः –** प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्न–विहताः विरमन्ति मध्याः, विघ्नैः मुहुः मुहुः अपि प्रतिहन्यमानाः प्रारब्धम् उत्तमजनाः न परित्यजन्ति।

**अन्वयः –** नीचैः विघ्नभयेन न प्रारभ्यते खलु, मध्याः प्रारभ्य, विघ्नविहताः विरमन्ति, उत्तमजनाः विघ्नैः मुहुः मुहुः प्रतिहन्यमानाः प्रारब्धं न परित्यजन्ति।

**प्रसङ्गः–** अस्मिन् पद्ये कर्तव्यनिर्वाहकाले जनानां प्रवृत्तिः पृथक्–पृथक् भवतीति कविः वर्णयति।

**व्याख्या –** नीचैः – अधमैः क्षुद्रैः वा, विघ्नभयेन – बाधाभयेन, न – नहि, प्रारभ्यते – समारभ्यते प्रवर्त्यते वा, खलु–निश्चयेन, मध्याः – मध्यम–स्वभावाः, प्रारभ्य–कार्यारम्भं कृत्वा, विघ्नविहताः – अन्तरायव्याकुलाः प्रत्यूहपीड़िताः वा, विरमन्ति – कार्यं परित्यजन्ति, उत्तमजनाः – श्रेष्ठपुरुषाः उदात्तगुणसम्पन्नाः जनाः वा, विघ्नैः – बाधादिभिः, मुहुः मुहुः अपि–पुनः पुनः अपि, प्रतिहन्यमानाः – विचाल्यमानाः, समाक्रान्ताः वा, प्रारब्धम् – आरब्धं कृतारम्भं वा न – नैव, परित्यजन्ति – मुञ्चन्ति त्यागं (कुर्वन्ति) वा।

**भावार्थः –** नीचाः (अधमाः) जनाः विघ्नभयेन कार्यारम्भमेव न कुर्वन्ति, मध्यमाः जनाः कार्यं प्रारभन्ते परन्तु विघ्नेषु समागतेषु तत्कार्यं परित्यजन्ति। उत्तमजनाः विघ्नैः वारं वारमभिभूयमानाः सन्तः प्रारब्धं कार्यं कदापि न त्यजन्ति।

**व्याकरणम् –** विघ्नभयेन–विघ्नाद् भयमिति विघ्नभयम्, तेन–विघ्नभयेन (पं.त.) विघ्नविहताः – विघ्नैः विहता इति विघ्नविहताः ते विघ्नविहताः (तृ.त.), प्रारभ्य – प्र + आङ् (आ) रभ् + ल्यप् (प) विघ्नः वि+हन् + क्त + सु। प्रतिहन्यमानाः – प्रति+हन्+यक् (य) शानच् (आन) + जस्।

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा,**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।। 9 ।।**

**पदच्छेदः –** निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्, अद्य एव मरणम् अस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।

**अन्वयः –** नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु वा यथेष्टं गच्छतु। अद्यैव मरणमस्तु वा युगान्तरे अस्तु, तथापि धीराः न्याय्यात् पथः पदम् अपि न प्रविचलन्ति।

**प्रसङ्गः –** अस्मिन् पद्ये कविः धीरपुरुषाणां दृढनिष्ठां वर्णयन् कथयतीति यत् धैर्यशालिनः कदापि नीतिमार्गं न त्यजन्ति।

**व्याख्या –** नीतिनिपुणाः – नीतिशास्त्रविशारदाः, निन्दन्तु–निन्दां कुर्वन्तु, यदि वा–अथवा, स्तुवन्तु–स्तुतिं कुर्वन्तु प्रशंसन्तु वा, लक्ष्मीः – सम्पत्तिः, ऐश्वर्यं वा, समाविशतु–आगच्छतु, समीपम् आयातु वा, गच्छतु–अपसरतु, व्रजतु वा, वा – अथवा, यथेष्टम् – इच्छानुसारम्, यथाऽभीष्टम्, अद्य एव – अधुना एव साम्प्रतमेव, मरणम् – निधनम्, मृत्युः युगान्तरे–अन्यस्मिन् युगे, कालान्तरे वा, अस्तु – भवतु वा – अथवा, न्याय्यात् – शास्त्रोचितमार्गात्, न्यायोचितात्, पथः – मार्गात् पद्धतेः वा, प्रविचलन्ति–विचलिताः भवन्ति, इतस्ततः भवन्ति वा, पदम् – एकपदमपि, न – नैव धीराः – धैर्यशालिनः, धैर्यवन्तः।

**भावार्थः –** मनस्विनः पुरुषाः अन्येषां कृतां निन्दां स्तुतिं वा न गणयन्ति, सम्पत्तिः आयातु गच्छतु वा इत्यपि ते न अभिलषन्ति, मृत्युमपि उपेक्ष्यन्ते, परन्तु न्यायमार्गं कदापि न त्यजन्ति।

**व्याकरणम् –** नीतिनिपुणाः – नीतौ निपुणाः इति नीतिनिपुणाः (स.त.) समाविशतु–सम्+ आङ्. (आ) + विश् + लोट् (तिप्)। यथेष्टम् – यथा + इष्टम् (गुण–सन्धिः)

**ज़ाड्यं धियो हरति सिञ्चति वाचि सत्यं,**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं,**
**सत्सङ्.गतिः कथय किं न करोति पुंसाम्।। 10 ।।**

**पदच्छेदः –** जाड्यं धियः हरति सिञ्चति वाचि सत्यम्, मानोन्नतिम् दिशति, पापम् अपाकरोति, चेतः प्रसादयति दिक्षु तनोति कीर्तिम् सत्सङ्.गतिः कथय किम् न करोति पुंसाम्।

**अन्वयः –** (सत्सङ्गतिः) धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति, कथय सत्सङ्गतिः पुंसाम् किं न करोति।

**प्रसङ्गः –** अस्मिन् पद्ये कविः सत्सङ्.गतेः महिमानं साधु वर्णयति।

**व्याख्या –** धियः–बुद्धेः, मतेः वा, जाड्यम् – जडत्वं, जडतां वा, हरति–दूरीकरोति निवारयति वा, वाचि–वचसि, वाण्यां वा, सत्यम्–तथ्यं वस्तुतत्त्वं वा, सिञ्चति–पल्लवयति प्रतिपादयति वा, मानोन्नतिम् – सम्मानवृद्धिं सम्मानोत्कर्षं वा, दिशति–सम्पादयति निर्दिशति वा, पापम्–कल्मषं पातकं वा, अपाकरोति–दूरीकरोति विनाशयति वा, चेतः – चित्तम् अन्तःकरणं वा, प्रसादयति–आनन्दयति, हर्षयति वा, दिक्षु–काष्ठासु, दिशासु वा, कीर्तिम् – यशः, तनोति – विस्तारयति, प्रसारयति, कथय – ब्रूहि, वद वा, सत्सङ्गतिः सज्जनसङ्गमः, साधुसङ्गः, पुंसाम्–नराणां जनानां वा, किं न करोति–किं किं कार्यं न सम्पादयति साधयति वा। अत्र समुच्चयालङ्कारः वर्तते।

**भावार्थः –** मनुष्याणां सज्जनैः सह संसर्गः सर्वविधं कल्याणं सम्पादयति, तद्यथा सत्सङ्.तिः बुद्धेः मान्द्यं नाशयति, वाण्यां सत्यतां स्थापयति, सम्मानं वर्धयति, चेतः आह्लादयति, कीर्तिं च विस्तारयति।

**व्याकरणम् :** मानोन्नतिम्–मानस्य उन्नतिः मानोन्नतिः, ताम्–मानोन्नतिम् (ष.त.), सत्सङ्.गतिः – सतां सङ्गतिः – सत्सङ्गतिः (ष.त.)। प्रसादयति – प्र + सद् + णिच् + लट् (तिप्)। सत्सङ्.गति : सत् + सम् + गम् + क्तिन् (ति) + सु।

**पापान्निवारयति योजयते हिताय,**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**

**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।। 11।।**

**पदच्छेदः –** पापात् निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति, आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणम् इदं प्रवदन्ति सन्तः।

**अन्वयः –** पापात् निवारयति हिताय योजयते, गुह्यं निगूहति गुणान् प्रकटीकरोति, आपद्गतं च न जहाति, काले च ददाति, सन्तः इदं सन्मित्रलक्षणं प्रवदन्ति।

**प्रसङ्गः** – अस्मिन् पद्ये कविः सन्मित्रस्य यथार्थं लक्षणं प्रतिपादयति।

**व्याख्या –** पापात् – पापकर्मणः, पातकात् वा, निवारयति–अपसारयति दूरीकरोति वा, हिताय–श्रेयसे कल्याणाय वा, योजयते–प्रवर्तयति प्रेरयति वा, गुह्यम् – गोपनीयं गोप्यं वा, निगूहति–गोपायति, गोपनं करोति वा, गुणान् – दयादाक्षिण्यादिगुणान् उत्कर्षधर्मान् वा, प्रकटीकरोति – प्रकटयति सम्मुखम् आनयति वा, आपद्गतम् – सङ्कटापन्नं विपत्तिग्रस्तः, च – तथा, न – नैव, जहाति–परित्यजति उपेक्षते वा, काले–समये अवसरे वा, च तथा ददाति – प्रयच्छति, वितरति वा, इदम् – एतत् सन्तः सज्जनाः सत्पुरुषाः वा, सन्मित्रस्य – महनीयमित्रस्य, श्रेष्ठसुहृदः लक्षणाम्–चिह्नं परिज्ञानं वा, प्रवदन्ति कथयन्ति दिशन्ति वा।

**भावार्थः** – सज्जनाः सन्मित्रं तदेव कथयन्ति यत् स्वमित्रं दुष्कर्मणः निवारयति सत्कर्माण्यनुष्ठातुं प्रवर्तयते, तस्य रहस्यं कुत्रचित् न वदति, गुणान् च प्रख्यापयति, यथावसरं साहाय्यं च करोति इति।

## व्याकरणम् –

सत् च तत् मित्रम् इति सन्मित्रम्, तस्य लक्षणम्–सन्मित्र–लक्षणम् (कर्मधा), आपद्गतम् – आपदं गतः इति आपद्गतः, तम् – आपद्गतम् (द्वि.त.पु.)। निवारयति–नि+वृ+णिच्+लट् (तिप्)। योजयते – युज् + णिच् + लट् (त)। गुह्यम्– गुह् + क्यप् (य) + सु (अम्)।

**मनसि वचसि काये पुण्यपीयूषपूर्णाः,**

**त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**

**परगुणपरमाणून् पर्वतीकृत्य नित्यम्,**

**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।। 12।।**

**पदच्छेदः –** मनसि वचसि काये पुण्यपीयूषपूर्णाः, त्रिभुवनम् उपकार–श्रेणिभिः प्रीणयन्तः, परगुणपरमाणून् पर्वतीकृत्य नित्यम् निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।

**अन्वयः** – मनसि वचसि काये च पुण्यपीयूषपूर्णाः उपकारश्रेणिभिः त्रिभुवनं प्रीणयन्तः परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्तः कियन्तः सन्ति ?

**प्रसङ्गः –** अस्मिन् पद्ये कविः सज्जनानां वैशिष्ट्यं विरलतां च सूचयति।

**व्याख्याः –** मनसि – हृदये चेतसि वा, वचसि–वचने वाण्यां वा, काये–शरीरे देहे वा, पुण्यपीयूषपूर्णाः – सत्कृत्यसुधाप्रपूरिताः, उपकारश्रेणिभिः – अनुग्रहसमूहैः, त्रिभुवनम् – लोकत्रयम्, जगत्त्रयीं वा, प्रीणयन्तः – प्रसादयन्तः, मोदयन्तः वा, परगुणपरमाणून् – अन्येषां सूक्ष्मगुणान्, अपरेषां, स्वल्पमात्रान् गुणान्, पर्वतीकृत्य – शैलान् इव वृद्धाकारान् विज्ञाय, नित्यम्– सततं, सर्वदा, निजहृदि–निजहृदये स्वान्तःकरणे

वा विकसन्तः–विकासं प्राप्नुवन्तः, सन्तः–सज्जनाः सत्पुरुषाः, कियन्तः – कियत्संख्याकाः कति वा, सन्ति – विद्यन्ते वर्तन्ते वा। अत्र अनुप्रासः अलंकारः वर्तते।

**भावार्थः –** मनसा, वाचा, कर्मणा धर्ममाचरन्तः उपकारेण लोकत्रयं तर्पयन्तः अन्येषां क्षुद्रान् अपि गुणान् महत्तरान् विधाय वर्णयन्तः सर्वदा स्वचेतसि हर्षमनुभवन्तः सज्जनाः दुर्लभाः एव सन्ति।

## व्याकरणम् –

**पुण्यपीयूषपूर्णाः –** पुण्यम् एव पीयूषम् इति पुण्यपीयूषम्, तेन पूर्णः इति पुण्यपीयूषपूर्णाः। उपकारश्रेणिभिः – उपकाराणां श्रेणिः इति उपकारश्रेणिः, ताभिः उपकारश्रेणिभिः (ष.त.)। परगुणपरमाणून् परेषां गुणाः इति परगुणाः ते एव परमाणवः इति परगुणपरमाणवः, तान् परगुणपरमाणून् (ष.त.)। प्रीणयन्तः – प्री + णिच् + शतृ (अत्) + जस्। विकसन्तः – वि + कस् + शतृ + जस्। कियन्तः – कियत् + जस्।

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,**
**न स्नानं न विलेपनं न कुसुमं नालङ्.कृता मूर्धजाः।**
**वाण्येका समलङ्.करोति पुरुषं या संस्कृता धार्यते,**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।। 13 ।।**

**पदच्छेदः –** केयूराणि न भूषयन्ति पुरुषम् हाराः न चन्द्रोज्ज्वलाः, न स्नानं न विलेपनम् न कुसुमम् न अलङ्.कृताः मूर्धजाः, वाणी एका सम् अलङ्करोति पुरुषम् या संस्कृता धार्यते, क्षीयन्ते खलु भूषणानि सततम् वाग्भूषणम् भूषणम्।

**अन्वयः –** केयूराणि पुरुषं न भूषयन्ति, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्.कृताः मूर्धजाः न (पुरुषं भूषयन्ति), एका वाणी पुरुषं समलङ्.करोति, या संस्कृता धार्यते भूषणानि खलु क्षीयन्ते, वाग्भूषणं सततं भूषणं (भवति)।

**प्रसङ्गः –** प्रस्तुतश्लोके कविः मनुष्यस्य वास्तविकम् आभूषणं किम् अस्तीति प्रतिपादयति।

**व्याख्या –** केयूराणि–भुजभूषणानि, बाहुबन्धाभूषणानि वा, पुरुषम् – नरं मनुष्यं वा, न–नैव, भूषयन्ति – अलङ्.कुर्वन्ति शोभयन्ते वा, चन्द्रोज्ज्वलाः, चन्द्रः इव देदीप्यमानाः विधुः इव प्रकाशमानाः वा, हाराः – माल्यानि, न – नैव, स्नानम् – जलावगाहनं जलादिभिः देहशुद्धिः वा, न–नैव, विलेपनम् – लेपविधानं, सुगन्धितलेपविशेषो वा, न–नैव, कुसुमम्–पुष्पं सुमनं वा, अलङ्.कृताः – सुशोभिताः, सुसज्जिताः वा, मूर्धजाः–केशाः, शिरोरुहाः वा, न–नैव (पुरुषं भूषयन्ति)। एका–केवला एकसंख्याका वा वाणी–वाक्, गीः वा, पुरुषम् – नरं मनुष्यं वा, समलङ्.करोति – विभूषयति सम्यग् अलङ्करोति वा, या–वर्ण्यमाना, सस्कृता–संस्कारवती संस्कारयुक्ता वा, धार्यते–स्वीक्रियते, अङ्गीक्रियते वा, भूषणानि – आभूषणानि, मण्डनानि वा, खलु – निश्चयेन, क्षीयन्ते–नश्यन्ति क्षयं प्राप्नुवन्ति वा, वाग्भूषणम् – वाणीरूपः, अलङ्कारः सततम् – निरन्तरम् अविरतं वा, भूषणम् – विभूषणं मण्डनं वा (भवति)। अत्र उपमालंकारः वर्तते।

**भावार्थः –** अङ्गदाद्याभूषणं, चन्दनं केशसज्जा च नरं तथा न भूषयन्ति यथा व्याकरणादिपरिष्कृता वाणी तु समलङ्.करोति। अन्यानि च आभूषणानि कालक्रमेण नश्यन्ति, वस्तुतः वाग्भूषणं सततम् आभूषणम् अस्ति।

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**

**विद्या बन्धुजनो विदेशगमने विद्या परा देवता,**

**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।। 14 ।।**

**पदच्छेदः –** विद्या नाम नरस्य रूपम् अधिकम् प्रच्छन्नगुप्तम् धनम्, विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः, विद्या बन्धुजनः विदेशगमने विद्या परा देवता, विद्या राजसु पूज्यते न तु धनम् विद्याविहीनः पशुः।

**अन्वयः –** विद्या नाम नरस्य अधिकं रूपं (विद्यते) प्रच्छन्नगुप्तं धनं (विद्यते) विद्या भोगकरी यशःसुखकरी (च) (विद्यते) विद्या गुरूणां गुरुः विद्या विदेशगमने बन्धुजनः (भवति) विद्या परा देवता वर्तते विद्या राजसु पूज्यते न तु धनम् विद्याविहीनः पशुः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः विद्यायाः वैशिष्ट्यं प्रतिपादपति।

**व्याख्या –** विद्या–ज्ञानविशेषः, शास्त्राधिगमः वा, नाम–नामधेयम्, इत्याख्यं वा, नरस्य–पुरुषस्य मानवस्य वा, अधिकम् – अतिरिक्तम् उन्नतं वा, रूपम् – स्वरूपम् सौन्दर्यं वा (विद्यते–वर्तते), प्रच्छन्नगुप्तम् – निगूढरक्षितं निर्भयस्थानस्थितं वा, धनम् – वित्तम्, अर्थः वा (विद्यते) विद्या–ज्ञानविशेषः भोगकरी – सुखोपभोगः समृद्धिसुखानुभूतिः वा, यशः – कीर्तिः, प्रतिष्ठा वा, सुखकरी – आनन्दकरी (विद्यते), विद्या–ज्ञान विशेषः, गुरूणां गुरुः – गुरुजनानां गुरुः (अग्रणी) (विद्यते)। विद्या–विशिष्टज्ञानम् विदेशगमने–परदेशप्रस्थाने, अन्यद्देशव्रजने, बन्धुजनः–आत्मीयजनः, स्वकीयजनः वा, (भवति), विद्या–विशिष्टज्ञानम्, राजसु–नृपेषु, भूपतिषु वा, पूज्यते–अर्च्यते, आद्रियते वा, न तु धनम्–न तु ऐश्वर्यं वैभवं वा, विद्याविहीनः, विद्याशून्यः विद्यारहितो वा पशुः – जन्तुः पशुप्रायः (भवति)। अत्र अनुप्रासः अलङ्.कारः वर्तते।

**भावार्थः –** विद्या मानवस्य श्रेष्ठं रूपं, गोपनीयं धनं, सुखसाधनप्रदायिका, यशः – आनन्दवर्धिका, विदेशगमने बन्धुरिव हितकारिका राजसम्मानदायिका च वर्तते। एतादृश्या विद्यया शून्यः मानवः साक्षात् पशुरिव भवतीति।

### व्याकरणम् –

**प्रच्छन्नगुप्तम् –** प्रच्छन्नं च गुप्तं च इति प्रच्छन्नगुप्तम् (कर्मधा0)। यशःसुखकरी–यशः सुखं चेति यशःसुखे ते करोतीति यशःसुखकरी (द्वन्द्वः)। विदेशगमने – विदेशस्य गमनमिति–विदेशगमनम् तस्मिन्–विदेशगमने (ष.त..)। विद्या–विद्+क्यप् (य) + टाप् + सु, देवता – देव + तल् (त) + टाप् + सु।

**रे रे चातक ! सावधानमनसा मित्र! क्षणं श्रूयताम्,**

**अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**

**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**

**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।। 15 ।।**

**पदच्छेदः –** रे रे चातक ! सावधानमनसा मित्र ! क्षणम् श्रूयताम्, अम्भोदाः बहवः हि सन्ति गगने सर्वे अपि न एतादृशाः। केचिद् वृष्टिभिः आर्द्रयन्ति वसुधाम् गर्जन्ति केचिद् वृथा, यम् यम् पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः।।

**अन्वयः –** रे रे मित्र ! चातक ! सावधानमनसा क्षणं श्रूयताम्, गगने हि बहवः अम्भोदाः सन्ति, सर्वे

अपि एतादृशाः न (सन्ति), केचिद् (अम्भोदाः) वृष्टिभिः वसुधाम् आर्द्रयन्ति, केचित् (च) वृथा गर्जन्ति, (अतः) यं यं पश्यसि तस्य तस्य पुरः दीनं वचः मा ब्रूहि।

**प्रसङ्गः –** धनाभिलाषया याचकेन सर्वेषां पुरतः न याचनीयम् इति चातकस्य व्याजेन कविरत्र निर्दिशति।

**व्याख्याः –** रे रे – अरे, भोः। मित्र ! – सखे, बन्धो ! वा, चातक ! सारङ्ग ! सावधानमनसा – एकाग्रचित्तेन, अवहितेन चेतसा वा, क्षणम् – क्षणमात्रं, पलमात्रं वा, श्रूयताम् – निशम्यताम्, अवधार्यतां वा, गगने – नभसि, आकाशे वा, बहवः – अनेके, भूयांशः वा, अम्भोदाः, जलदाः, मेघाः वा, सन्ति – वर्तन्ते, सर्वेऽपि–सकलाः अपि, अखिला अपि वा, एतादृशाः – एवंविधाः, ईदृशाः वा, न – नैव, केचित् – केचन, कतिपये वा, वृष्टिभिः – वर्षाभिः, वृष्टिजलैः वा, वसुधाम् – पृथिवीं, भूमिं वा, आर्द्रयन्ति – क्लेदयन्ति, आर्द्रां कुर्वन्ति वा, केचित्, केचन, अपरे वा, वृथा–व्यर्थमेव, निरर्थकमेव, वृथैव वा, गर्जन्ति–नदन्ति, गर्जनां कुर्वन्ति वा, यं यम् – कमपि मेघम्, पश्यसि–वीक्षसे, अवलोकयसि वा, तस्य तस्य पुरतः – तस्य अभिमुखम्, तत् समक्षे वा, दीनं वचः – दैन्यपूर्णवचनम्, याचनास्पदं वचनं वा, मा ब्रूहि–न वद, न कथय इति। अत्र अप्रस्तुतप्रशंसा अलङ्कारः वर्तते।

**भावार्थः –** आकाशे बहवः जलदाः दृश्यन्ते, परं तेषां विषये केचन एवं कथयन्ति यत् भो चातक ! आकाशे ये केचन मेघाः सन्ति सर्वे न प्रार्थनीयाः अपितु जलदो मेघ एव प्रार्थनीयः। इत्थमेव अर्थेच्छुकैः जनैः सर्वे नराः न प्रार्थनीयाः अपितु सम्यक् परीक्ष्य दातुः पुरतः एव याचकैः स्वाशयः प्रकटनीय इति।

### व्याकरणम् –

सावधानमनसा – सावधानं च तद्मनः इति सावधानमनः, तेन सावधानमनसा (कर्मधा०। अम्भोदाः – अम्भस् + दा + क (अ) + जस् (अस्)। वसुधाम् – वसु + धा + क + (अ) + टाप् (आ) + अम्। पुरतः – पुर + तसिल् (तस्) आर्द्रयन्ति – आर्द्र + णिच् + लट् + झि।

## अभ्यास–प्रश्नाः

### 1. बहुविकल्पात्मकाः प्रश्नाः –

### निर्देशः – समुचितविकल्पस्य क्रमाक्षरं कोष्ठके निर्दिशत इति।

1. वित्तस्य तृतीया गतिः इयं खलु –

(क) दानम् (ख) भोगः

(ग) नाशः (घ) वृद्धिः

2. गजेषु कीदृशः सिंहः निपतति –

(क) वृद्धावस्थः (ख) युवावस्थः

(ग) मृतः (घ) शिशुरपि

3. धीराः कस्माद् न विरमन्ति –

(क) भीमविषात् (ख) निश्चितार्थात्

(ग) अमृतात् | (घ) अनिश्चितार्थात्

4. नवाम्बुभिः घनाः भवन्ति –
(क) दूरविलम्बिनः | (ख) पतिताः
(ग) एकत्रिताः | (घ) भारभूताः

5. धीराः पदमपि न प्रविचलन्ति –
(क) कण्टकयुक्तात् पथः | (ख) उच्चावचात् पथः
(ग) न्याय्यात्पथः | (घ) कर्दमात् पथः

6. मनसि वचसि काये सन्तः भवन्ति –
(क) चञ्चलतापूर्णाः | (ख) पुण्यपीयूषपूर्णाः
(ग) ईर्ष्याकलुषिताः | (घ) लोभाकुलाः

7. विद्या केषां गुरुः अस्ति –
(क) मूर्खाणाम् | (ख) शत्रूणाम्
(ग) विदुषाम् | (घ) गुरूणाम्

8. सततं किं भूषणम् अस्ति –
(क) रत्नाभूषणम् | (ख) वस्त्राभूषणम्
(ग) वाग्भूषणम् | (घ) रजताभूषणम्

## अतिलघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य एकवाक्यात्मकम् उत्तरं प्रदेयम् –**

1. कं नरं ब्रह्माऽपि रञ्जयितुं न शक्नोति ?
2. वित्तस्य काः तिस्रः गतयः सन्ति ?
3. साहित्यसंगीतकलाविहीनः पुरुषः केन नाम्ना उच्यते ?
4. धीराः कस्माद् न विरमन्ति ?
5. फलोद्गमैः के नम्राः भवन्ति ?
6. समृद्धिभिः सत्पुरुषाः कीदृशाः भवन्ति ?
7. प्रारब्धं कार्यं के न परित्यजन्ति ?
8. विघ्नविहताः के विरमन्ति ?
9. दिक्षु कीर्तिं का तनोति ?
10. विद्या बन्धुजनः कदा भवति ?

## लघूत्तरात्मकप्रश्ना

### निर्देशः – प्रतिप्रश्नं पंक्तिचतुष्टयात्मकम् उत्तरं लेखनीयम् –

1. ज्ञानलवदुर्विदग्धः कः उच्यते ?
2. **'न वयस्तेजसां हेतुः'** इति पङ्क्तेः कः अभिप्रायः ?
3. के जनाः मनुष्यरूपेण मृगाश्चरन्ति ?
4. पशूनां परमं भागधेयं किम् उच्यते ?
5. देवेषु महार्हरत्नानां भीमविषस्य च कः कः प्रभावः अजायत ?
6. कीदृशः स्वभावः भवति परोपकारिणाम् ?
7. अधम–मध्यम–उत्तमजनानां कार्यप्रवृत्तिः कीदृशी भवति ?
8. सत्सङ्गतेः कानिचन चत्वारि फलानि लिखत।
9. कानि–कानि भूषणानि सततं क्षीयन्ते ?
10. **'यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः** इति पङ्क्तेराशयः सम्यक् प्रदर्शनीयः।

## निबन्धात्मकाः प्रश्नाः

### निर्देशः – प्रत्येकस्य प्रश्नस्य उत्तरं दशपंक्तिषु लेखनीयम् –

1. विद्यायाः विभिन्नानि रूपाणि कानि सन्ति ?
2. **'रे रे चातक सावधानमनसा'** इति पङ्क्तेरभिप्रायं प्रदर्शयत।
3. **'केयूराणि न भूषयन्ति पुरुषम्'** इति श्लोकस्य आशयं प्रदर्शयत।
4. **'न्याय्यात् पथः प्रविचलन्ति पदं न धीराः'** इति पद्यस्य भावं स्पष्टयत।
5. **'न वयस्तेजसां हेतुः'** इत्यस्य आशयं प्रतिपादयत।

## व्याकरणपल्लवनम्

### सन्धि –परिज्ञानम्

नाशस्तिस्रः – नाशः + तिस्रः – नाशस्तिस्रः – सत्वम्, विसर्गसन्धिः।

शिशुरपि – शिशुः + अपि – शिशुरपि – सत्वम्, विसर्गसन्धिः।

गतिर्भवति – गतिः + भवति – गतिर्भवति – सत्वम् – विसर्गसन्धिः।

मृगाश्चरन्ति – मृगाः + चरन्ति – मृगाश्चरन्ति – सत्वं, श्चुत्वम्, विसर्गसन्धिः।

खादन्नपि – खादन् + अपि – खादन्नपि – नकारद्वित्वम्, हल्सन्धिः।

निश्चितार्थाद्विरमन्ति–निश्चितार्थात् +विरमन्ति–निश्चितार्थाद्विरमन्ति–जश्त्वम् हल्सन्धिः

फलोद्गमैः – फल + उद्गमैः – फलोद्गमैः गुणः, स्वरसन्धिः।

एवैषः – एव + एषः – एवैषः – वृद्धिः, स्वरसन्धिः।

पुनरपि – पुनः + अपि – पुनरपि – रुत्वम्, विसर्गसन्धिः।

अद्यैव – अद्य + एव – अद्यैव – वृद्धिः, स्वरसन्धिः।

सन्मित्रम् – सत् + मित्रम् – सन्मित्रम् – अनुनासिकपरसवर्णः, हल्सन्धिः।

वाण्येका – वाणी + एका – वाण्येका – यण्, स्वरसन्धिः।

क्षीयन्तेऽखिलभूषणानि–क्षीयन्ते+अखिलभूषणानि–क्षीयन्तेऽखिलभूषणानि पूर्वरूपम्,स्वरसन्धिः।

चन्द्रोज्ज्वलाः – चन्द्र + उज्ज्वलाः – गुणः, स्वरसन्धिः।

## समास–परिचयः –

ज्ञानलवदुर्विदग्धम् – ज्ञानस्य लवम् इति ज्ञानलवम्, (ष.त.), ज्ञानलवेन दुर्विदग्धः इति ज्ञानलवदुर्विदग्धम् (तृ.त.)।

मदमलिनकपोलभित्तिषु – मदेन मलिना कपोलभित्तिः यस्य सः, इति मदमलिनकपोलभित्तिः, तेषु इति मदमलिनकपोलभित्तिषु (तत्पुरुषगर्भः बहुव्रीहिः)।

साहित्यसङ्गीतकलाविहीनः – साहित्यं च सड्.गीतं च कलाश्चेति साहित्यसङ्गीतकलाः इति (इतरेतरद्वन्द्वः), साहित्यसङ्गीतकलाभिः विहीनः इति साहित्यसङ्गीतकलाविहीनः इति (द्वन्द्वगर्भ–तृतीया–तत्पुरुषः)।

फलोद्गमैः– फलानाम् उद्गमः इति फलोद्गमः तैः इति फलोद्गमैः (तृ.त.)

नवाम्बुभिः – नवं च तद् अम्बु इति नवाम्बु, तैः इति नवाम्बुभिः (कर्मधारयः)

अनुद्धताः – न उद्धताः इति अनुद्धताः (नञ्–तत्पुरुषः)।

विघ्नभयेन – विघ्नाद् भयम् इति विघ्नभयम्, तेन विघ्नभयेन इति (पं.तत्पु.)।

विघ्नविहताः – विघ्नैः विहताः इति विघ्नविहताः (तृ. तत्पु.)।

उत्तमजनाः – उत्तमाः च ते जनाः इति उत्तमजनाः (कर्मधारयः)।

नीतिनिपुणाः – नीतौ नीतिषु वा निपुणाः इति नीतिनिपुणाः (स. तत्पु.)।

यथेष्टम – इष्टम् अनतिक्रम्य इति यथेष्टम् (अव्ययीभावः)।

आपद्गतम् – आपदं गतः इति आपद्गतः तम् आपद्गतम् (द्वि. तत्पु.)।

सन्मित्रम् – सत् च मित्रं च इति सन्मित्रम् (कर्मधारयः)।

पुण्यपीयूषपूर्णाः – पुण्यपीयूषेण पूर्णाः इति पुण्यपीयूषपूर्णाः (तृ.तत्पु.)।

## प्रकृतिप्रत्ययानां परिचयः

आराध्यः – आङ्. + राध् + ण्यत् (य) पुं. प्रथमैकवचनम्।

सुखतरम् – सुख + तरप् (तर) + सु प्र.वि.ए.व. क्रियाविशेषणम्।

गतिः – गम् + क्तिन् (ति) + सु – प्र0वि.ए.व.।

खादन् – खाद + शतृ (अत्) + सु – पुं.प्र.वि.ए.व.।

जीवमानः – जीव् + शानच् (आन) + सु – पुं.प्र.वि.ए.व.।

प्रमार्ष्टुम् – प्र + मृज् + तुमुन् (तुम्) अव्यय–प्रत्ययः।

दूरविलम्बिनः – दूर + वि + लम्ब् + णिनि (इन्) + जस् – प्र.वि.ब.व.।

प्रविहन्यमानः – प्र + वि + हन् + यक् + शानच् + सु – प्र.वि.ए.व.।

प्रारब्धम् – प्र + आङ् + रभ् + क्त + अम् – नपुं. द्वि.वि.ए.व.।

न्याय्यात् – न्याय + यत् + ङसि + – पुं.प.वि.ए.व.।

गुह्यम् – गुह् + क्यप् (य) + अम् – नपुं.द्वि.वि.ए.व.।

पर्वतीकृत्य – पर्वत + च्वि + कृ + (तुक्) ल्यप् (य) – अव्ययप्रत्ययः।

प्रच्छन्नम् – प्र + छद् + क्त + सु – नपुं.प्र.वि.ए.व.।

## धातुसङ्ग्रहः

प्रतिश्लोकं क्रियापदं चित्वा धातूनां सङ्.ग्रहः करणीयः। तेषां लकारादिप्रयोगविषये च ज्ञानं करणीयम्। ततः तेषां क्रियापदानां यथाशक्ति वाक्ये प्रयोगः कर्तव्यः। यथा–प्रथमे श्लोके रञ्जयति–बालकः मोदकं दृष्ट्वा रञ्जयति। भुङ्क्ते–रामः स्वकीयं धनं स्वयं न भुङ्क्ते। भवति – प्रातःकालीनः भास्करः ताम्रवर्णः भवति। निपतति–श्वानः विडालोपरि निपतति।